"यत्र नार्य्यपच्यवमुपच्यवञ्च शिक्षते" इति ऋ० १,२८,३ "अपच्यव्यं शालायानिर्गममिति" भा० । अप—च्यु—क्षरणे, अप् । अपक्षरणे । [क्षरिते च ।

**अपच्युत** त्रि० अप+च्यु—कर्त्तरि क्त । अपक्षयप्राप्ते नष्टप्राये-

**अपजर्गुराण** त्रि० अप+गॄ—यङ् लुक्—ताच्छील्ये चानश् । आच्छादनादिमोचनशीले "जिगर्त्तिमिन्द्रो अपजर्गुराण" इति ऋ० ५,२९,४, ।

**अपञ्चीकृत** त्रि० अपञ्चात्मकः पञ्चात्मकः कृतः न०त० । पञ्चात्मकतामनासादिते सूक्ष्मभूते, पञ्चीकारप्रकारस्तु पञ्चीकरणशब्दे वक्ष्यते "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् अपञ्चीकृतभूतोत्थं सूक्ष्माङ्गं भोगसाधनमिति" वेदा०प० ।

**अपजय** पु० अप+जि—भावे अच् । पराजये ।

**अपटान्तर** त्रि० पटेन तिरस्करिण्या अन्तरमत्र न०त० । अव्यवहिते, आसन्ने, संसक्ते च । अपदान्तरमित्यप्यत्रैवार्थे ।

**अपटी** स्त्री अल्पः पटः पटी न०त० । (कानात्) इति ख्याते काण्डपटे वस्त्रप्रावरणे स च "दूष्याधोलम्बिवायुसञ्चाराद्यैः पटभेद" इति मल्लिनाथः ।

**अपटीक** त्रि० नास्ति पटी यस्य कप् । प्रावरणपटशून्ये, अपगता टीकाव्याख्याग्रन्थोयस्य । टीकाज्ञानशून्ये, "अपटीकोजड़ोमाघे भृशं जाड्येन ताड्यते" इत्युद्भटः ।

**अपटीक्षेप** पु० अपट्याः काण्डपटस्य क्षेपः । प्रावरणपटक्षेपे । नाट्ये हि प्रावरणपटे अन्तराक्षिप्ते एव पात्रप्रवेशोऽभिनयसम्प्रदायस्तमुल्लङ्घ्य पात्रेण यत्र काण्डपटं स्वयं क्षिप्त्वा प्रविश्यते तेन चाकस्मिकत्वं तत्प्रवेशस्य गम्यते । एतत्प्रयोगश्च भूरिशो नाटकेषु ।

**अपटु** त्रि० पटुर्दक्षः न०त० । रोगिणि, दक्षतारहिते, कार्य्याक्षमे, दक्षताविरोधिमन्दत्वे च । भावे त्व अपटुत्वम् । अपाटवे । तल् । अपटुताप्यत्रैव त्वान्तं न०तलन्तं स्त्री । गुणवचनत्वात् इमनिच् । अपटिमा तत्रैव पु० ।

**अपण्य** त्रि० न पण्यः विक्रेयः अप्राशस्त्ये न०त० । स्मृत्यादिनिषिद्धविक्रये पदार्थे । प्रायश्चित्तसहितानि अपण्यानि च प्रायश्चित्तविवेके दर्शितानि यथा

विष्णुः । कृष्णवस्त्ररङ्गरत्नगुड़गन्धमधुरसोर्णाविक्रयी त्रिरात्रमुपवसेत् । रङ्गः सिन्दूरकुसुम्भादि । एतत् सकृद्विक्रये पैठीनसिः । "तथाऽविक्रेयाणि ब्राह्मणस्य लवणं पक्वान्नं मधुरक्षीरं दधि घृतमुदकं सर्व्वगन्धोलाक्षारक्तवासो गुड़स्तैलं ग्राम्यपशूनामेकशफाः केशिनः । सर्व्वे चारण्याः पशवोविद्यापूर्त्तमिष्टं गावः शङ्खसोमौ चेति विक्रयेण तेषामेकैकस्मिन् प्राजापत्यञ्चरेत्" । तथाच्यवनः "दधिमधूच्छिष्टसर्पिःपक्वान्नतिलतक्रक्षीररसविषतिलाञ्चनीलीकौषेयवासोलाक्षारसलवणविक्रये प्राजापत्यञ्चरेत् । एतच्चाभ्यासविषयं तत्र धेनुरेका दातव्या । हारीतः । "लाक्षालवणमांसतैलक्षीरदधिघृततक्रगन्धचर्म्मरक्तवाससामेकतमविक्रये चान्द्रायणम्" तथा शातातपः । "आममांसमुरासोमलाक्षालवणसर्पिषाम् । विक्रये सर्व्वपण्यानां द्विजश्चान्द्रायणञ्चरेत्" । एतच्चात्यन्ताभ्यासे चान्द्रायणे चाष्टधेनवः । भविष्यपुराणे । "गुड़ं तिलांस्तथा नीलीं केशगोधूमकन्यकाः । विक्रये ब्राह्मणोऽप्याशु कृच्छ्रं सान्तपनञ्चरेत्" । एतद्वारत्रयाभ्यासे सान्तपने धेनुद्वयम् । हारीतः "अयोसिंसेशिकेशरिणाञ्च धेन्वनडुद्वृषशस्त्रविस्तविक्रये तप्तकृच्छ्रविधिः । हिङ्गुगुग्गुलुरससर्जरसहरितालमनःशिलाञ्जनगैरिकक्षारलवणमणिमौक्तिकप्रबालदन्तनखशुक्तिशङ्खवेणुवैणवस्त्रमयविक्रये च । आरामतड़ागोदपानपुष्करिणीपूर्त्तसुहृद्विक्रयेषु त्रिषवणस्नाय्यधःशायी चतुर्थकालभुक् संवत्सरेण पूतोभवतीति" । आरामादिनिखिलविक्रये ह्येतदितिधर्म्मप्रदीपः । तथा "हीनोन्मानमापनसङ्करसङ्कीर्णविक्रये च" । अत्र च कामाकामसकृदभ्यासापेक्षया-वैषम्यदोषः समर्थनीयः । हीनमानोन्मानमापनं तुलादीनाङ्करसङ्कीर्णत्वं द्रव्यस्याद्रव्येण । विष्णुः "प्राणिभूपुष्पसोमविक्रयी तप्तकृच्छ्रं कुर्य्यात् । अन्नौषधिपुष्पमूलचर्म्मबिदलतुषकार्पासकेशभस्मास्थिगोरसपिण्याकतिलतैलविक्रयी प्राजापत्यम्" । विदलः पाचितवंशादिनिर्म्मितः । तथा "स्लेष्मजतुमधूच्छिष्टशङ्खशुक्तित्रपुशीशककृष्णलोहोदुम्बरखड्गपात्रविक्रयी महासान्तपनम्" । स्लेष्मा चर्म्मविकारः वरूडेति यस्य पर्य्यायः । महासान्तपने धेनुद्वयम्, सुमन्तुः "देवर्षिसोमचैत्यप्राजापत्यकूपोदपानदारात्मनां विक्रये कृच्छ्रद्वयम् । घृततिलतैलरक्तवस्त्रपक्वान्नानां प्राजापत्यंचरेत् । गोविक्रयनिन्दामाह यमः । "गवां विक्रयकारी च गवि रोमाणि यानि तु । तावद्वर्षसहस्राणि गवां गोष्ठे कृमिर्भवेत्" ॥ यच्च मनुनोक्तं सद्यः पतति मांसेन लाक्षया लवणेन च । त्र्यहेण शूद्रीभवति ब्राह्मणः क्षीरविक्रयीति, तन्निन्दातिशयार्थम् । गौतमः । "पशवः हिंसायोगे" अस्यार्थः यत्र विक्रीताः सन्तः पशवोहिंस्यन्ते तत्र तेषामप्यपण्यत्वम् । यानि चान्यानि गुरुतरप्रायश्चित्तबोधकवचनानि तानि बहुतरकालाभ्यासे समूह्यानि शूद्रस्य त्वत्यन्तापदि दोषाभावमाह पराशरः । "लवणं मधु मद्यं वा दधि तक्रं घृतं